संस्कृत-वार्ता:

दिनाङ्क : 12.11.2025 सायम् - 06:20

<u>आदौ मुख्यवार्ता:</u>

- प्रधानमन्त्री श्रीमोदी भूटान-नरेशेण चतुर्थ-डुक्-ग्याल्पो इत्यनेन सह कालचक्र-शक्तिकरण-समारोहस्य उद्घाटनम् अकरोत्। सहैव भूटानदेशस्य द्विदिवसीया-राजकीय-यात्रां समाप्य स्वदेशम् प्रति समागत: ।
- राष्ट्रपतिः द्रौपदी मुर्मुः अद्य गैबोरोन-नगरे बोत्सवाना-देशस्य राष्ट्रपतिना डुमा-बोको-इत्यनेन सह विस्तृतविषयेषु चर्चां कृतवती।
- विदेशमन्त्री डॉ. एस.जयशङ्करः प्रोक्तवान् यत् भारत-कनाडा चोभयोः देशयोः मध्ये पारस्परिक संबंधा: सुदृढा: भवेयु:। स: स्वसमकक्षीयै: जी-सप्त देशानाम् विदेशमन्त्रिभि: सहापि मेलनं कृतवान्।
- अद्य प्रातः अभिनेता धर्मेन्द्रः चिकित्सालयात्  स्वगृहं प्रति समागतः।

---------------------------------------------------

<u>प्रधानमन्त्री-भूटानयात्रा</u>

प्रधानमन्त्रिणः नरेन्द्रमोदिनः भूटानदेशस्य द्विदिवसीया-राजकीया-यात्रा सफला जाता। यात्रावधौ प्रधानमन्त्री श्रीमोदी भूटान-नरेशेण चतुर्थ-डुक्-ग्याल्पो इत्यनेन सह कालचक्र-शक्तिकरण-समारोहस्य उद्घाटनम् अकरोत्। एकस्मिन् सामाजिक-सञ्जालीय-सन्देशे प्रधानमन्त्री अवदत् यत् परम-पावन-जे-खेम्पो-महोदयेन अस्य समारोहस्य अध्यक्षता कृता, येन कार्यक्रमोऽयं इतोऽपि विशिष्टः सञ्जातः । कालचक्र-शक्तिकरणं, एकं महत्त्वपूर्णं बौद्ध-अनुष्ठानम् अस्ति, एतत् तावत् वैश्विक-शान्ति-प्रार्थना-महोत्सवस्य अंशः अस्ति, यश्च विश्वेभ्यः बौद्ध-विद्वांसः श्रद्धालवः च एकत्रिताः। इतः पूर्वं अद्य श्रीमोदी भूटानस्य चतुर्थ-नरेशेण जिग्मे-सिंग्ये-वांग्चुक इत्यमुना सह मेलनं कृतवान्। हिमालयीय-राष्ट्रस्य स्वीययात्रायाः प्रथमे दिने, प्रधानमन्त्री मोदी भूटानस्य ऊर्जा-परियोजनानां वित्तपोषणाय चतुस्सहस्र-कोटि-रूप्यकाणां ऋण-सहायतां घोषितवान्। एषा घोषणा ह्यः थिम्फू-नगरे भूटान-नरेशेण सह तस्य गोष्ठ्याः परम् अभवत्, यत्र द्वावपि नेतारौ परस्पर-हितस्य क्षेत्रीय-वैश्विक-विषयेषु चर्चाम् अकुरुताम्। प्रधानमन्त्री-नरेशौ च संयुक्त-

रूपेण विंशत्यधिकैकसहस्र-मितायाः पुनत्सांगछू-द्वितीय-जलविद्युत-परियोजनायाः उद्घाटनम् अकुरुताम् । एतत् भारत-भूटान-ऊर्जा-सहयोगे एकः महत्त्वपूर्णः पदक्रमः वर्तते ।

उभाभ्यामपि नेतृभ्यां द्विपक्षीय-सम्बन्धान् दृढीकर्तुं नवीकरणीय-ऊर्जा-क्षेत्रे, मानसिक-स्वास्थ्य-सेवा-क्षेत्रे तथा स्वास्थ्य-सेवा-क्षेत्रे च त्रयाणां सन्धि-ज्ञापकानाम् आदान-प्रदानम् कृतम्। भूटान-नरेशेण दिल्ली-लालकिलायां सञ्जाते विस्फोटे पीडितानां कृते सहस्रशैः भूटानी-नागरिकैः सह प्रार्थना-सभायाः नेतृत्वं कृतम्। प्रधानमन्त्री मोदी स्वकीयेन भूटानी-समकक्षेण दाशो-शेरिंग-तोबगे इत्यमुना सहाऽपि अमिलत् । द्वावपि नेतारौ द्वादशशत-मेगावाट-मितस्य पुनत्सांगछू-प्रथम-जलविद्युत-परियोजनायाः मुख्य-सेतु-बन्धे पुनः कार्य-प्रारम्भस्य स्वागतम् अकुरुताम् तथा तस्य समयबद्धं समापनं सुनिश्चेतुं सहमतिं व्यक्तवन्तौ। इयं भारत-भूटानाभ्यां संयुक्तरुपेण विकसिता बृहत्तमा जलविद्युत-परियोजना भविष्यति। प्रधानमन्त्री इदानीम् स्वदेशं प्रत्यागतः वर्तते।

---------------------------------------------------

<u>राष्ट्रपतिःबोत्सवाना</u>

राष्ट्रपतिः द्रौपदी मुर्मुः अद्य गैबोरोन-नगरे बोत्सवाना-देशस्य राष्ट्रपतिना डुमा-बोको-इत्यनेन सह द्वैपाक्षिकं वार्तालापं कृत्वा परस्पर-हितस्य विस्तृतविषयेषु चर्चां कृतवती। व्यापार-निवेशे, कृषौ, पुनर्नवीकरणीय-ऊर्जायाम्, स्वास्थ्ये, शिक्षायाम्, कौशल-विकासे, रक्षणे, डिजिटल-प्रौद्योगिक्यां एतादृशेषु प्रमुखेषु क्षेत्रेषु सहयोगं वर्धयितुं विस्तृत-चर्चासु उभयनेतृभ्यां सहमतिः प्रकटिता ।

अङ्गोला-देशस्य प्रवासं समाप्य राष्ट्रपतिः मुर्मुः अफ्रीका-महाद्वीपस्य द्विराष्ट्र-यात्रायाः अन्तिमे चरणे गतरात्रौ बोत्सवाना-देशं गतवती। सामाजिक-अन्तर्जालीय-संदेशे राष्ट्रपतिः मुर्मुः चीतापरियोजनायाः अग्रिम-चरणस्य अन्तर्गतं भारतं प्रति व्याघ्राणां प्रेषणार्थं राष्ट्रपतिं बोकों तथा बोत्सवाना-देशस्य जनेभ्यः धन्यवादं प्रकटितवती। अस्मिन् अवसरे बोत्सवाना-देशस्य नागरिकाणां कृते उच्च-गुणवत्तायुक्ताः तथा सुलभ-मूल्यात्मकाः भारतीय-औषधयः सुलभतया प्राप्यन्ते इति सन्धिपत्रे अपि हस्ताक्षरितानि कृतानि।

---------------------------------------------------

**प्रधानमंत्री-दिल्ली**

प्रधानमन्त्री नरेन्द्रमोदी सोमवासरे लोकनायक-जयप्रकाश-नारायण-चिकित्सालयं गत्वा राष्ट्रिय-राजधान्यां सञ्जाते वाहन-विस्फोटनस्य पीडितान् अभ्यगच्छत्। भूटान्-देशस्य द्विदिनात्मक-यात्रां समाप्य दिल्ल्यां आगत्य प्रधानमन्त्री तत्क्षणमेव चिकित्सालयं गतवान्। श्रीमोदी व्रणितैः सह वार्तालापं कृत्वा तेभ्यः शीघ्रं स्वस्थतां प्रार्थयत्। चिकित्सालयस्य अधिकारिणः चिकित्सकाः च तान् परिस्थितिं सूचितवन्तः। सामाजिक-अन्तर्जाल-पटलस्य एकस्मिन् संदेशे श्रीमोदिना उक्तम् यत् अस्य षड्यन्त्रस्य पृष्ठे ये सन्ति, ते न्यायस्य समक्षे नयिष्यन्ते ।

---------------------------------------------------

**एस.जयशङ्करः**

विदेशमन्त्री डॉ. एस.जयशङ्करः अद्य कनाडादेशस्य जी-सप्त देशानाम् विदेशमन्त्रिणां उपवेशनमतिरिच्य कनाडादेशस्य विदेशमन्त्रिणा अनीता आनन्देन सह मिलितवान्। एकस्मिन् अन्तर्जालीय संदेशे डॉ. जयशङ्कर: अस्य आयोजनस्य कृते अनीता आनन्दं प्रशंसितवान्। सममेव उभयोः देशयोः मध्ये पारस्परिक संबंधाः सुदृढाः भवेयुः इति आशा प्रकटिता। डॉ. जयशङ्करः मेक्सिकोदेशस्य विदेशमन्त्रिणा डॉ. जुआन रामोन डे ला फुएन्तेवर्येण सह अपि मेलनं विहितवान्। सहैव उभयोः देशयोः मध्ये व्यापार, वाणिज्यं, स्वास्थ्य, विज्ञानं , प्रौद्योगिकी चेत्यादिषु क्षेत्रेषु सहयोगं संवर्धनाय परिचर्चा विहिता।

ब्रिटेन देशस्य विदेशसचिवेन यवेट कूपरवर्यया सह संभाषयन् डॉ. जयशङ्करः द्विपक्षीयसम्बन्धेषु सकारात्मक प्रगतेः पुनः पुष्टिः कृता । कार्यक्रमावधौ सः ब्राजीलदेशस्य विदेशमन्त्रिणा मौरो वियरा, जर्मनदेशस्य विदेशमन्त्रिणा जोहान वेडफुल्, दक्षिण अफ्रीकादेशस्य विदेशमन्त्रिणा रोनाल्ड् लामोला च सह मेलनं विहितवान्।

---------------------------------------------------

**अभिनेता धर्मेन्द्रः**

अद्य प्रातः अभिनेता धर्मेन्द्रः चिकित्सालयात् स्वगृहं प्रति समागतः। ब्रीच कैण्डी चिकित्सालयस्य एकः चिकित्सकः अद्य मुम्बई-नगरे वार्ताहरैः सह संभाषयन् अवदत् यत् नवाशीतिः वर्षीयः अभिनेतुः अग्रिमा चिकित्सा गृहे एव भविष्यति। धर्मेन्द्रस्य

पारिवारिकजनैः एकस्मिन् आधिकारिक-वक्तव्ये प्रख्यापितम् यत् जनाः सार्वजनिकेषु माध्यमेषु, तस्य गोपनीयतायाः सम्मानं कुर्वन्तु इति। परिवारः तेषां सुस्वास्थ्यस्य कामनायै, दीर्घजीवनस्य शुभकामनायै च सर्वेषां जनानां कृते कृतज्ञतां प्रकटितवान्।

------------------------------------------------------

<u>जनरल उपेन्द्र द्विवेदी</u>

सेना प्रमुखः जनरल उपेन्द्र द्विवेदी अद्य आधुनिकयुद्धस्य कृते प्रौद्योगिक्याः लोकतंत्रीकरणस्य भौगोलिकप्रसारस्य, उपयोगस्य च आह्वानं कृतवान्। नवदिल्ल्यां सञ्जाते दिल्ली-रक्षा-संवाद इति कार्यक्रमे सम्बोधयन् श्री द्विवेदी-महोदयः अवदत् यत् भारतीय-सेना मानव-केन्द्रित-प्रौद्योगिकी इत्यादिषु क्षेत्रेषु संवर्धनार्थं विचारं करोति।

------------------------------------------------------

<u>बाल-पुरस्कारम्</u>

पञ्चविंशत्यधिक-द्विसहस्रतमस्य वर्षस्य साहित्य-अकादमी-बालसाहित्य-पुरस्कारः अस्य मासस्य चतुर्दशे दिनाङ्के नवदिल्ल्यां प्रस्तूयते। बालसाहित्य-विधायाः वार्षिकपुरस्कारान् साहित्य-अकादम्याः अध्यक्षः माधव-कौशिकः प्रदास्यति। संस्कृति-मन्त्रालयेन अद्य सूचितं यत् पुरस्कार-विजेतृभ्यः कांस्यफलकं च पञ्चाशत्सहस्र-रूप्यकाणां धनराशिः च दीयते इति।

।। इति वार्ताः ।।